Appendix. 2

# परिशिष्ट : २

योऽक्षरात्परतरः परेश्वरो ब्रह्मरूपमुनिभिः सुपूजितः ।
सर्वजीवदया–नराकृतिः श्रीहरिं तमहमानतोऽस्मि हि ।।१।।

| वचनामृतम् | प्रमाणवचनानि | आकरः |
|---|---|---|
| ग.प्र.१, म.३ | अन्यक्षेत्रे कृतं पापं तीर्थक्षेत्रे विनश्यति ।<br>तीर्थक्षेत्रे कृतं पापं वज्रलेपो भविष्यति ।। | स्कन्दपुराणम् |
| ग.प्र.१४ | अन्ते या मतिः सा गतिः | हिरण्यकेशीय–<br>शाखाश्रुतिः |
| ग.प्र.१५सा.११<br>ग.म.१,८,१६ | अनेकजन्मसंसिद्धस्ततो याति परां गतिम् । | गीता–६/४५ |
| ग.प्र.३८ | मिथिलायां प्रदीप्तायां न मे दह्याति किञ्चन । | महाभारते मोक्षधर्मः |
| ग.प्र.४० | श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् ।<br>अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ।। | भाग.७/५/२३ |
| ग.प्र.४१ | तदैक्षत (एकोऽहं) बहु स्यां प्रजायेय । | छां.६/२/३ |
| ग.प्र.४१ | स्वकृतविचित्रयोनिषु विशन्निव हेतुतया<br>तरतमतश्चकास्स्यनलवत् स्वकृतानुकृतिः । | भाग.१०/८७/२६ |
| ग.प्र.४२ | भज गोविन्दं भज गोविन्दं<br>गोविन्दं भज मूढमते । | चर्पटपंजरी |
| ग.प्र.४३ | मत्सेवया प्रतीतं च सालोक्यादिचतुष्टयम् ।<br>नेच्छन्ति सेवया पूर्णाः कुतोऽन्यत्कालविप्लुतम् ।। | भाग.९/४/६७ |
| ग.प्र.४३ | सालोक्य–सार्ष्टिसामीप्य–सारूप्यैकत्वमप्युत ।<br>दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः ।। | भाग.३/२९/१३ |
| ग.प्र.४३ | अथो विभूतिं मम मायाविनस्तामैश्वर्यमष्टाङ्–<br>गमनुप्रवृत्तम् । श्रियं भागवतीं वास्पृहयन्ति भद्रां<br>परस्य मे तेऽश्नुवते तु लोके ।। | भाग.३/२५/३७ |

| | | |
|---|---|---|
| ग.प्र.५०,<br>ग.म.२० | या निशा सर्वभूतानां तस्यां जागर्ति संयमी ।<br>यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः ॥ | गीता–२/६९ |
| ग.प्र.५४ | प्रसङ्गमजरं पाशमात्मनः कवयो विदुः ।<br>स एव साधुषु कृतो मोक्षद्वारमपावृतम् ॥ | भाग.३/२५/२० |
| ग.प्र.६२ | सत्यं शौचं दया क्षान्तिस्त्यागः सन्तोष आर्जवम् ।<br>शमो दमस्तपः साम्यं तितिक्षोपरतिः श्रुतम् ॥ | भाग.१/१६/२६ |
| | ज्ञानं विरक्तिरैश्वर्यं शौर्यं तेजो बलं स्मृतिः ।<br>स्वातन्त्र्यं कौशलं कान्तिर्धैर्यं मार्दवमेव च ॥ | भाग.१/१६/२७ |
| | प्रागल्भ्यं प्रश्रयः शीलं सह ओजो बलं भगः ।<br>गाम्भीर्यं स्थैर्यमास्तिक्यं कीर्तिर्मानोऽनहंकृतिः ॥ | भाग.१/१६/२८ |
| ग.प्र.७० | यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।<br>तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥ | गीता–१८/७८ |
| सा.१ | जितं जगत्केन ? मनो हि येन । | मणिरत्नमाला |
| सा.११, का.१ | निरञ्जनः परमं साम्यमुपैति । | मुण्डक.३/१/३ |
| का.१ | बुद्धीन्द्रियमनःप्राणान् जनानामसृजत्प्रभुः ।<br>मात्रार्थं च भवार्थं च ह्यात्मनेऽकल्पनाय च ॥ | भाग.१०/८७/२ |
| का.१, पं.२ | यतो वाचो निवर्तन्ते अप्राप्य मनसा सह । | तै.आन.९ |
| का.१ | बहवो ज्ञानतपसा पूता मद्भावमागताः । | गीता–४/१० |
| लो.७ | तमेव विदित्वातिमृत्युमेति नान्यः<br>पन्था विद्यतेऽयनाय । | श्वेता.४/१० |
| लो.७, पं.६ | यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः ।<br>अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥ | गीता–१५/१८ |
| लो.७ | विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् । | गीता–१०/४२ |
| लो.७. | मत्त परतरं नान्यत्किञ्चिदस्ति धनञ्जय ! ।<br>मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥ | गीता–७/७ |
| लो.७, पं.६ | पश्य मे पार्थ ! रूपाणि शतशोऽथ सहस्रशः ।<br>नानाविधानि दिव्यानि नानावर्णाकृतीनि च ॥ | गीता–११/५ |
| लो.७. | नैष्कर्म्यमप्यच्युतभाववर्जितं<br>न शोभते ज्ञानमलं निरञ्जनम् । | भाग. १/५/१२ |
| लो.७ | कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः ।<br>अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः ॥ | गीता–४/१७ |
| लो.७, पं.२<br>अन्त्य.३ | ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति ।<br>समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥ | गीता–१८/५४ |

| | | |
|---|---|---|
| लो.७ | भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।<br>अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥<br>अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।<br>जीवभूतां महाबाहो ! ययेदं धार्यते जगत् ॥ | गीता–७/४–५ |
| लो.७ | अन्तः प्रविष्टः शास्ता जनानां सर्वात्मा ! | यजु.आ. ३–११ |
| लो.७ | यस्याक्षरं शरीरं एष सर्वभूतान्तरात्माऽ–<br>पहतपाप्मा दिव्यो देव एको नारायणः ॥ | सुबालोपनिषत्<br>खं.७ |
| लो.७ | यस्यात्मा शरीरं य आत्मानमन्तरो<br>यमयति स त आत्मान्तर्याम्यमृतः । | बृह.अ.३, ब्रा.७–२२ |
| लो.७ | ऋते ज्ञानान्न मुक्तिः । | |
| लो.७ | यस्य पृथिवी शरीरं यः पृथिवीमन्तरो<br>यमयति स त आत्मान्तर्याम्यमृतः । | बृह.अ.३, ब्रा.७–३ |
| लो.७ | आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ ! ॥ | गीता–७/१६ |
| लो.७, पं.३ | तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते । | गीता–७/१७ |
| लो.१०,<br>अन्त्य.२८,३९ | द्युपतय एव ते न ययुरन्तमनन्ततया<br>त्वमपि यदन्तराऽऽण्डनिचया ननु सावरणाः । | भा.१०/८७/४१ |
| लो.१० | यश्च मूढतमो लोके यश्च बुद्धेः परं गतः ।<br>तावुभौ सुखमेधेते क्लिश्यत्यन्तरितो जनः ॥ | भाग.३/७/१७ |
| लो.१० | विषया विनिवर्तन्ते निराहारस्य देहिनः<br>रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते ॥ | गीता–२/५९ |
| लो.१० | सत्त्वं यद् ब्रह्मदर्शनम् । | भाग.१/२/२४ |
| लो.१० | विद्याविद्ये मम तनू विद्ध्युद्धव ! शरीरिणाम् ।<br>बन्धमोक्षकरी आद्ये मायया मे विनिर्मिते ॥ | भाग.११/११/३ |
| लो.१३<br>अन्त्य.३३ | तत्सृष्टसृष्टसृष्टेषु कोऽन्वखण्डितधीः पुमान् ।<br>ऋषिं नारायणमृते योषिन्मय्येह मायया । | भाग.३/३१/३७ |
| लो.१३ | एतदीशनमीशस्य प्रकृतिस्थोऽपि तद्गुणैः ॥<br>न युज्यते सदात्मस्थैर्यथा बुद्धिस्तदाश्रया ॥ | भाग.१/११/३८ |
| लो.१३,<br>व.५ | दैवी ह्येषा गुणमयी मम माया दुरत्यया ।<br>मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥ | गीता–७/१४ |
| लो.१३ | मम साधर्म्यमागताः । | गीता–१४/२ |
| लो.१३ | अपरिमिता ध्रुवास्तनुभृतो यदि सर्वगता–<br>स्तर्हि न शास्यतेति नियमो ध्रुव ! नेतरथा । | भाग.१०/८७/३० |
| लो.१३ | एकमेवाद्वितीयं (ब्रह्म) । | छांदो.६/२/१ |

| | | |
|---|---|---|
| लो.१४ | न कुर्यात्कर्हिचित्सख्यं मनसि ह्यनवस्थिते ।<br>यद्विश्रंभाच्चिराच्चीर्णं चस्कन्द तप ऐश्वरम् ॥<br>नित्यं ददाति कामस्य छिद्रं तमनु येऽरयः ।<br>योगिनः कृतमैत्रस्य पत्युर्जायेव पुंश्चली ॥ | भाग.५/६/३–४ |
| लो.१५ | त्यज धर्ममधर्मं च उभे सत्यानृते त्यज ।<br>उभे सत्यानृते त्यक्त्वा येन त्यजसि तत्त्यज ॥ | भार.मोक्ष.३३/४ |
| लो.१५.<br>अन्त्य.५ | मद्भयाद्वाति वातोऽयं सूर्यस्तपति मद्भयात् ।<br>वर्षतीन्द्रो दहत्यग्निर्मृत्युश्चरति मद्भयात् ॥ | भाग/३/२५/४२ |
| लो.२८ | भूभारः क्षपितो येन तां तनुं विजहावजः ।<br>कण्टकं कण्टकेनैव द्वयं चापीशितुः समम् ॥ | भाग.२५/३४–३५ |
| लो.१८ | तेनैव रूपेण चतुर्भुजेन<br>सहस्रबाहो ! भव विश्वमूर्ते! । | गीता–११/४६ |
| लो.१८, पं.७ | अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् ।<br>परं भावमजानन्तो मम भूतमहेश्वरम् ॥ | गीता–९/११ |
| पं.२ | सर्वं खल्विदं ब्रह्म । | छांदो.३/१४/१ |
| पं.२ | नेह नानास्ति किञ्चन । | बृहदा.४/४/१९ |
| पं.२ | इदं हि विश्वं भगवानिवेतरो<br>यतो जगत्स्थान–निरोधसम्भवाः । | भाग.१/५/२० |
| पं.२,<br>अन्त्य.३ | आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे ।<br>कुर्वन्त्यहैतुकीं भक्तिमित्थं भूतगुणो हरि ॥ | भाग.१/७/१० |
| पं.२,३, म.३९<br>अन्त्य.३ | परिनिष्ठितोऽपि नैर्गुण्ये उत्तमश्लोकलीलया ।<br>गृहीतचेता राजर्षे आख्यानं यदधीतवान् ॥ | भाग.२/१/९ |
| पं.३ | नैर्गुण्यस्था रमन्ते स्म गुणानुकथने हरे । | भाग.२/१/७ |
| पं.३ | तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते । | गीता–७/१७ |
| पं.४ | अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ।<br>प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥ | गीता–१५/१४ |
| पं.४ | दृष्ट्वेदं मानुषं रूपं तव सौम्यं जनार्दन ! ।<br>इदानीमस्मि संवृत्तः सचेताः प्रकृतिं गतः ॥ | गीता–११/५१ |
| पं.७ | जन्माद्यस्य...यत्र त्रिसर्गो मृषा ।<br>धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि ॥ | भाग.१/१/१ |
| पं.७ | स वेद धातुः पदवीं परस्य दुरन्तवीर्यस्य<br>रथाङ्गपाणेः । योऽमायया सन्ततयानुवृत्त्या<br>भजेत तत्पादसरोजगन्धम् ॥ | भाग.१/३/३८ |

| | | |
|---|---|---|
| पं.७ | स ईक्षत । | ऐतरेय.१/१ |
| पं.७ | पुरुषेणात्मभूतेन वीर्यमाधत्त वीर्यवान् । | भाग.३/५/२६ |
| ग.म.१ | ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते ।<br>सङ्गात्सञ्जायते कामः कामात्क्रोधोऽभिजायते ॥<br>क्रोधाद् भवति संमोहः संमोहात् स्मृतिविभ्रमः ।<br>स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात् प्रणश्यति ॥ | गीता.२/६२–६३ |
| ग.म.१ | समलोष्टाश्मकाञ्चनः । | गीता.१४/२४ |
| ग.म.१ | प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ।<br>उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतम् ॥ | गीता–७/१८ |
| ग.म.८ | ममैवांशो जीवलोके जीवभूतः सनातनः ।<br>मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति ॥ | गीता.१४/२८ |
| म.९,१७<br>व.५ | सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज ।<br>अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥ | गीता.१८/६६ |
| ग.म.९ | स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् । | गीता–२/४० |
| ग.म.१०,<br>व.१८ | जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः ।<br>त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन! ॥ | गीता–४/९ |
| ग.म.११ | आमयो येन भूतानां जायते यश्च सुव्रत! ।<br>तदेव ह्यामयं द्रव्यं न पुनाति चिकित्सितम् ॥<br>एवं नृणां क्रियायोगाः सर्वे संसृतिहेतवः ।<br>त एवात्मविनाशाय कल्पन्ते कल्पिताः परे ॥ | भाग.१/५/३३–३४ |
| ग.म.११ | कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः ।<br>स बुद्धिमान् मनुष्येषु स युक्तः कृत्स्नकर्मकृत् ॥ | गीता–४/१८ |
| ग.म.१३ | न तद्भासयते सूर्यो न शशाङ्को न पावकः ।<br>यद्गत्वा न निवर्तन्ते तद्धाम परमं मम ॥ | गीता–१५/६ |
| ग.म.१६ | श्रद्धावान् लभते ज्ञानं तत्परः संयतेन्द्रियः ।<br>ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ॥ | गीता–४/३९ |
| ग.म.५४ | यस्यात्मबुद्धिः कुणपे त्रिधातुके<br>स्वधीः कलत्रादिषु भौम इज्यधीः ।<br>यत्तीर्थबुद्धिः सलिले न कर्हिचित्<br>जनेष्वभिज्ञेषु स एव गोखरः ॥ | भाग.१०/८४/१३ |
| वर.१ | अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः ।<br>मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रयः ॥ | भाग.२/१०/१ |
| वर.२ | नारायणपरा वेदा देवा नारायणाङ्गजाः ।<br>नारायणपरा लोका नारायणपरा मखाः ॥ | भाग.२/५/१५–१६ |

नारायणपरो योगो नारायणपरं तपः ।
नारायणपरं ज्ञानं नारायणपरा गतिः ॥

वर.२ वासुदेवपराः वेदा वासुदेवपराः मखाः । भाग.१/२/२८–२९
वासुदेवपरा योगा वासुदेवपराः क्रियाः ॥
वासुदेवपरं ज्ञानं वासुदेवपरं तपः ।
वासुदेवपरो धर्मो वासुदेवपरा गतिः ॥

वर.१२ अहो अमी देववरामर्चितं भाग.१०/१५/५
पादाम्बुजं ते सुमनःफलार्हणम् ।
नमन्त्युपादाय शिखाभिरात्मन–
स्तमोऽपहत्यै तरुजन्म यत्कृतम् ॥

अन्त्य.३ हरेर्गुणाक्षिप्तमतिर्भगवान् बादरायणिः ॥ भाग.१/७/११
अध्यगान् महदाख्यानं नित्यं विष्णुजनप्रियः ॥

अन्त्य.३ प्रायेण मुनयो राजन् । भाग.२/१/७

अन्त्य.५ यन्नामधेयश्रवणानुकीर्तनाद्यत्प्रवणाद्यत्स्मरणा– भाग.३/३३/६–७
दपि क्वचित् । श्वादोऽपि सद्यः सवनाय
कल्पते कथं पुनस्ते भगवन्नु दर्शनात् ॥

अहो बत श्वपचोऽतो गरीयान्
यज्जिह्वाग्रे वर्तते नाम तुभ्यम् ।
तेपुस्तपस्ते जुहुवुः सस्नुरार्या
ब्रह्मानूचुर्नाम गृणन्ति ये ते ॥

अन्त्य.२८ आसामहो चरणरेणुजुषामहं स्यां भाग.१०/४७/६१
वृन्दावने किमपि गुल्मलतौषधीनाम् ।
या दुस्त्यजं स्वजनमार्यपथं च हित्वा
भेजुर्मुकुन्दपदवीं श्रुतिभिर्विमृग्याम् ॥

अन्त्य.२८ अहो ! भाग्यमहो ! भाग्यं नन्दगोपव्रजौकसाम् । भाग.१०/१४/३२
यन्मित्रं परमानन्दं पूर्णं ब्रह्म सनातनम् ॥

अन्त्य.३३ येऽन्ये स्वतः परिहृतादपि बिभ्यति स्म । भाग.११/६/१७

शिक्षावाक्यामृतैः स्वीयैः स्वाश्रितानां सतां हृदि ।
विदधे हितपुष्टिं यः स्युस्तस्यैतानि मद्हृदि ॥१॥